# दिवाकरद्युतिः



वेदमार्तण्डाचार्यदिवाकरमहापात्राभिनन्दनग्रन्थः

# कैवल्यदीपिकानिरुक्ताध्यारोपापवादविमर्शः

**डॉ. जानकीशरणः**

नाविदितं सर्वेषां धीधनानां विदुषां यत्संस्कृतसाहित्ये दर्शनानि खल्वतीव महनीयं स्थानमलङ्कुर्वन्ति।दृश्यते साक्षात्क्रियते परमपुरुषार्थोऽनेन यद्वा दृश्यते विविच्यते तथ्यातथ्यमनेनेति दर्शनशब्दस्य व्युत्पत्तिः। सर्वा अपि दर्शनसरण्यः तत्त्वसमीक्षार्थमेव खलु प्रवर्तन्ते। तथापि तासां सर्वासां चिन्तनविधिर्भिन्नः। किञ्च तत्त्वाधिगमोऽपि भिन्न एव प्रतीयते तथापि तत्तद्दर्शनग्रन्थपरि-शीलनकाले जायते काचिद्विलक्षणैव श्रद्धा। एवञ्च तथ्यातथ्यविवेचनपुरस्सरं परमपुरुषार्थं साधयन्ति दर्शनानि । तत्रापि भारतीयदर्शनसमवाये मुकुटमणिपदवीमुपगच्छति भगवच्छङ्कराचार्यैःसंवर्धितो ब्रह्माद्वैतसिद्धान्तः। तेहिभगवत्पादाः **"ब्रह्मसत्यंजगन्मिथ्या जीवोब्रह्मैवनापरः[1]"** इत्यभिदधानो ब्रह्माद्वैततत्त्वं सम्यक्तयाप्रतिपादयन्ति । राद्धान्तोऽयं श्रुतिवाक्यप्रमाणकः । यथारज्जुतत्त्वाज्ञानेसतिरज्जुः सर्परूपेणविवर्तते यथा वाशुक्तितत्त्वाज्ञानेसतिशुक्तिः रजतरूपेण विवर्तते तथैव अज्ञानादेवब्रह्मप्रपञ्चरूपेण विवर्तते । अद्वितीयब्रह्मज्ञानादेवस्वस्वरूपभूतमोक्षप्राप्तिः।मोक्षोहिधर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषुपरमपुरुषार्थः। तत्रमोक्षस्य परमत्वंजन्मस्थितिविकारराहित्येननित्यत्वात्।तथाचश्रुतिः "नसपुनरावर्तते[2]" इतितदन्येधर्मार्थकामाः **"यत्कृतकंतदनित्यम्"** इतिन्यायेन अनित्याः। **तद्यथेहकर्मचितोलोकःक्षीयतएवमेवामुत्रपुण्यचितोलोकःक्षीयते[3]"**इति चश्रुतिः। कर्मफलस्यबन्धहेतुत्वमपिशास्त्रेस्फुटतयाअभिहितम्—

**"कर्मणाबध्यतेजन्तुर्विद्ययाचविमुच्यते।तस्मात्कर्मनकुर्वन्तियतयःपारदर्शिनः[4]"** इति । **"श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः। मत्वा च सततं ध्येय एते दर्शनहेतवः[5]"**

---

1. वेदान्तडिण्डिमः ६७; ब्रह्मज्ञानावलीमाला, २० पृ. ३१
2. छान्दोग्योपनिषत्, ८.१.१५
3. छान्दोग्योपनिषत्, ८.१.६
4. महाभारतेशान्तिपर्वणि२४१.६
5. विवरणप्रमेयसङ्ग्रहः, पृ. ४

इत्युक्तरीत्या श्रुतिवाक्येभ्यः श्रुत्वा उपपत्तिभिश्च मत्वा निदिध्यासनं कर्तव्यम् । ब्रह्मण अपरोक्षसाक्षात्कारादेव मोक्ष इति अद्वैतिनः। तस्मिन् ब्रह्मसाक्षात्कारे श्रवणमनननिदिध्यासनानि अन्तरङ्गसाधनानि। "**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः**[6]" इति बृहदारण्यकश्रुतौ ब्रह्मसाक्षात्कारमनूद्य तत्साधनत्वेन श्रवणमनननिदिध्यासनानां विधानात्। अमीषां साधनानां दीर्घकालपर्यन्तमनुष्ठानेन परमतत्त्वसाक्षात्काररूपा अखण्डाकारवृत्तिः ब्रह्मप्राप्तिसाधनभूता उत्पद्यत इति शास्त्रविदो निश्चप्रचमूदुः।

एतादृशस्य श्रुतिसिद्धस्य प्राचीनतमस्य अज्ञविज्ञोपकारकस्य कलदर्शनशिरोऽलङ्कारभूतस्याद्वैतवेदान्तदर्शनस्य प्रतिपादनं वेदोपनिषदादिषु चोपलभ्यते।"**को ह्यन्यः पुण्डरीकाक्षाद् महाभारतकृद्भवेत्**[7]" इति स्मृतिसिद्धो भगवदवतारो बादरायणो लोकानुजिघृक्षया परविद्याप्राप्ति-भूतब्रह्ममीमांसाशास्त्रं सन्दिग्धसकलवेदान्तनिर्णयार्थं प्रणिनाय। अस्य खल्वद्वैतवेदान्तस्य प्रतिष्ठाहेतुभूतस्य ब्रह्मसूत्रस्य श्रीमच्छङ्कराचार्यैः विस्तृतं प्रसन्नगम्भीरं शारीरकभाष्यं निरमायि। अद्वैतसिद्धान्ते नैकैराचार्यैः परमतत्त्वबोधनाय नैके पाण्डित्यपूर्णग्रन्थाः प्रणीताः। तेषूपनिषद्-गीता-सूत्र-भाष्य-वादप्रधान-अनुभवप्रधान-काव्यात्मकशैलीप्रधानाः ग्रन्थास्सन्ति।

श्रुतिस्मृतिन्यायेति प्रस्थानत्रयान्तर्गतास्सर्वेऽपि ग्रन्था व्याख्योपव्याख्यया व्याख्याताः। अद्वैतवेदान्तसाहित्ये प्रस्थानत्रयान्तर्गता अद्वैतवेदान्तसिद्धान्तप्रतिपादकाः प्रायः पञ्चशताधिका सव्याख्या निर्व्याख्याश्च विभिन्नैराचार्यकृता ग्रन्था उपलभ्यन्ते । एते च प्रकरणग्रन्थाः सिद्धान्तमात्रप्रदर्शनपराः, वादप्रधानखण्डनमण्डनपराः अनुभवात्मकभावाविष्करणपराः काव्यशैल्या सिद्धान्तप्रदर्शनपराश्चेति चतुर्धा विभक्तुं शक्यन्ते।

यद्यपि नैकासु लिपिषु विरचिता इमे ग्रन्थाःविद्वरेण्यैः संशोधनपुरःसरं प्रकाशिताः प्रकाशितावर्तन्ते। ग्रन्थ-नागरी-तमिल-तेलुगु-कन्नड-शारदाप्रभृतिषु नैकासु लिपिषु सन्ति बहवो हि ग्रन्था येऽमुद्रितास्सन्तो विभिन्नेषु प्राच्यविद्याग्रन्थालयेषूपलभ्यन्ते । अमीषु ग्रन्थेषु

---

[6]बृहदारण्यकोपनिषद्, २.४.५

[7]विष्णुपुराणम्, ३.४.५

उपलभ्यन्ते नैके वेदान्तविषया ये मुमुक्षूणां नितरामुपयोगिनस्सन्ति। अतीव सरलया रीत्या विविधदृष्टान्तपुरस्सरम्, विभिन्नमतसिद्धान्तोप-वर्णनपूर्वकमद्वैतमतस्य श्रेष्ठ्यमुपादेयत्वं च वर्णयन्त इमे न्यायप्रमाणोपबृंहिताः प्रकरणग्रन्थाः शास्त्रप्रमेयं स्फुटं प्रबोधयन्ति। तेषां मध्ये कृष्णविरचिता "कैवल्यदीपिका" सिद्धान्तार्थजिज्ञासून् नितरामुपकरोति।अस्याः कैवल्यदीपिकायाः मया विद्यावारिधिकालावधौ पाठसमीक्षात्मकं संशोधनं विहितम् तदाधारेण अध्यारोपापवादविमर्शः प्रस्तूयते ।

कैवल्यदीपिकायामित्थं वर्णनं दृश्यते यत् गुरूपसदनसन्दिहानमुमुक्षुशिष्यो निजस्वरूपावगमाय गुरुं पृच्छति—

**मां विज्ञाय जडं गुरो हृदि भवानेतद्वचः प्रोक्तवान्**<br>**सर्वे ज्ञातनिजस्वरूपगतयो लोके भवन्त्यातुराः।**<br>**उत्पत्तिक्षयशालिनः कथमहो निश्चित्य तत्त्वं मम**<br>**ब्रूहि त्वत्पदपङ्कजं गतवतां भूयो न दुःखं क्वचित्** ।[8]इति।

आत्मानात्मविवेकविलसितोऽयं भ्रम इति मनसि निधाय गुरुः "**अयंघटादिवदुपलभ्यमानो देहः, अयञ्च देही प्रत्यक् चेतनः**[9]" इति विविच्य आगताय शिष्याय बोधयामास। तदर्थमजानन् शिष्यः पुनः अस्मात्स्थूलाद्देहाद्विलक्षण आत्मा कोऽन्योस्तीति अप्राक्षीत्। तदा गुरुः तं जिज्ञासुं शिष्यमध्यारोपापवादाभ्याम् अवस्थात्रयविनिर्मुक्तमात्मानं प्रबोधयामास।[10]

अध्यारोपापवादन्यायेन तावत् वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यं ज्ञातुं शक्यते। तत्र अध्यारोपो नाम "**असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः**[11]"

---

[8] कैवल्यदीपिका १.२२

[9] कैवल्यदीपिका-प्रभाव्याख्या १.२२

[10] कैवल्यदीपिका १.२६

[11] वेदान्तसारः. पृ. ३२

इति। अपवादस्तु "**अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववद्वस्तुविवर्तस्य अवस्तुनोऽज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्**[12]" इति। व्यावहारिकवस्तुत्वेन अभिमतायां रज्जौ अवस्तुभूतसर्पस्य यः आरोपो भवति तत्र रज्ज्ववच्छिन्नचैतन्यनिष्ठा अविद्या सर्पज्ञानाभासाकारेण परिणमते सर्पाकारेण च विवर्तते। स च सर्पः रज्ज्ववच्छिन्न-चैतन्यनिष्ठाविद्योपादानकः इति "नायं सर्पः किन्तु रज्जुरेव" इति विशेषदर्शनोत्तर-कालीन-अधिष्ठानसाक्षात्कारभूतरज्जुसाक्षात्कारेण रज्जुगताज्ञाननिवृत्तौ सर्पभ्रान्तिः अपि निर्वर्तते। एवं परमार्थदृष्ट्या अज्ञानानुपहितं तुरीयचैतन्यं ब्रह्म एव वस्तु तच्च कालत्रयानपायि अखण्डं त्रिगुणातीतं सच्चिदानन्दरूपम् अद्वयम्। अज्ञानादिसकलजडसमूहः अवस्तु । अज्ञानतज्जन्य-व्योमादेः मिथ्यात्वदृश्यत्वसावयवत्वविकारित्वसापेक्षसिद्धिकत्वादिहेतुभिः अवस्तुत्वम्। अयं महाप्रपञ्चः अज्ञानजन्यत्वादवस्तुभूतः। तस्य अद्वैतचैतन्यरूपे वस्तुनि आरोपः अध्यारोपः।

अत्रेवं जिज्ञासा – कथमवस्तुनो निरात्मकस्य आरोपः भवेत्, यतः कस्यचिद् दृष्टापूर्वस्य सतः एव क्वचिदारोपो भवितुमर्हति। अत्रोच्यते—अवस्तुत्वं नात्यन्तासत्त्वम् अपि तु अनिर्वचनीयत्वम्। संस्कारजन्यः भ्रमः तत्सिद्धये पूर्वप्रतीतिमात्रम् अपेक्षते, न पुनः पूर्वप्रतीतस्य परमार्थसत्त्वमपि। अपि च एतस्य भ्रमस्य अनादिप्रवाहत्वात् नान्योन्याश्रयदोषप्रसङ्गः।[13] एवं वस्तुनि परमार्थे सति अवस्तुनः अनिर्वचनीयस्य आरोपो भवितुमर्हति। असङ्गोदासीने परमात्मवस्तुनि तद्विवर्तभूताज्ञानादिमिथ्याप्रपञ्चस्य चिद्वस्तुमात्रावशेषतया अवस्थानम् एव अपवादः। तदुक्तम् "**अधिष्ठानावशेषो हि नाशः कल्पितवस्तुनः**[14]" इति। तस्मात् कार्यस्य कारणमात्रसत्त्वावशेषणं चिद्विवर्तस्य प्रपञ्चस्य चिन्मात्रावस्थानम् एव वा अपवादः। अत्रायं भावः – वस्तुनः अन्यथाभावो द्विधा भवति—परिणामभावः विवर्तभावश्च । "वस्तुनस्तत्स-

---

[12]वेदान्तसारः पृ. १०९

[13]"नैसर्गिकोऽयं लोकव्यवहारः" – ब्र.सू.शां.भा. अध्यासभाष्यम्

[14]सूतसंहिता ४.२.८

**मसत्ताकोऽन्यथाभावः परिणामः, तदसमसत्ताको विवर्त इति**"[15]। वेदान्ते हि ब्रह्मणोऽविकारित्वाद् विवर्तभावोऽङ्गीक्रियते न तु परिणामभावः।

आभ्याम् अध्यारोपापवादाभ्यां तत्त्वम्पदार्थशोधनमपि सिद्धं भवति। अद्वैतब्रह्मणि अज्ञानवशात् यत् नानात्वमारोप्यते, तत्परित्यागेन जीवब्रह्मणोः ऐक्यं प्रतिपाद्यते। तथा हि समष्ट्यज्ञानम्, तदुपहितः ईश्वरः, अनुपहितं चैतन्यञ्चेति त्रितयम् अविविक्तं सत् तत्पदस्य वाच्यार्थो भवति। एवं व्यष्ट्यज्ञानम् तदुपहितः प्राज्ञः, अनुपहितं चैतन्यञ्चेति त्रितयम् अविविक्तं सत् त्वम्पदस्य वाच्यार्थो भवति। एतयोः वाच्यार्थयोः च विरोधात् ऐक्यं न सम्भवति। तस्मात् अद्वैतब्रह्मसिद्ध्यर्थं तत्त्वम्पदयोः वाच्यार्थपरित्यागेन लक्ष्यार्थो गृह्यते। लक्ष्यार्थश्च तत्पदस्य त्वम्पदस्य च अनुपहितं चैतन्यम्, तथा च जीवब्रह्मणोः ऐक्यं सिद्ध्यति।

अमुमेवार्थं प्रकटयन् ग्रन्थकारः "**तत्त्वमसि**[16]" इति महावाक्यस्थतत्त्वम्पदयोः वाच्यार्थौ विलक्षणधर्मकौ जीवेश्वरौ दर्शयन् तयोरुपाधिप्रविलापनमन्तरा तादात्म्यं न कदापि सम्भवतीति दर्शयति—

**अयं भवाँस्त्वं पदलक्ष्यमेव ब्रह्माद्वयं तत्पदलक्ष्यमेव।**
**अन्तान्वितौ जीवपरौ हि वाच्यौ नैक्यं तयोः भेदवतोः कदापि ॥**[17]इति।

तदनु अनयोः विलक्षणधर्मकजीवेश्वरयोः भेदो व्यावहारिकः, अभेदस्तु पारमार्थिकः इति निबध्नाति। अत्र ग्रन्थकारो जीवेशयोः भेदः व्यावहारिक एवेति साधनार्थं "**जीवेशयोः कीदृशो भेदः? स च लौकिको वा वैदिको वा? स च स्वाभाविको वाऽऽगन्तुकः?**[18]" इत्यादिरूपेण नैकान् पक्षान् उद्भाव्य तान्निराकुर्वन् तत्त्वम्पदयोः वाच्यार्थं परित्यज्य लक्ष्यार्थं स्वीकुर्वन् जीवेशयोः भेदः व्यावहारिक एव, अभेदस्तु पारमार्थिक इति वर्णयन् तयोरैक्यं

---

[15] सिद्धान्तलेशसङ्ग्रहः पृ. ५८
[16] छान्दोग्योपनिषद् ६.८.७
[17] कैवल्यदीपिका १.७६
[18] कैवल्यदीपिकाव्या १.७७

बोधयति । अत्रापि ग्रन्थकारेण “अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते[19]” इति न्यायमनुसृत्य सदृष्टान्तमध्यारोपापवादौ एवमुपक्रान्तौ—

**लोके तारं प्रदर्श्य प्रकटमथ जनोऽरुन्धतीं दर्शयिष्यन्**
**शाखामुच्चैः प्रदर्श्य प्रथितमुडु ततश्चन्द्रिका वा यथेह।**
**स्थूलं सम्यक्प्रबोध्य प्रथममतितरां सूक्ष्ममाकशतो यत्**
**पश्चाद्ब्रह्मस्वरूपं वरगुरुरभयं बोद्धुमैच्छत्क्रमेण।[20]इति।**

इत्थं सदृष्टान्तमपवादं निरूपयन् ग्रन्थकरो ब्रूते यत् प्रेक्षावतां सम्यग्दर्शिनाम् यथा अधिष्ठानज्ञाने सति रज्जुसर्पस्थले “नायं सर्पः किन्तु रज्जुरेव, वृथा मया भ्रान्तम्”। शुक्तिरजतस्थले “रूप्यं नास्ति किन्तु नीलपृष्ठत्रिकोणाकारा शुक्तिरेव” इति ज्ञानं जायते तथैव श्रुत्युक्त्यनुभवैः गुरूपदेशेन च “नासि त्वं संसारी किन्तु नित्यशुद्धबुद्धमुक्ताद्वितीयात्मा एव” इति बोधो जायते तदेव अपवादः। कल्पितकार्यस्य अपवादे हि तस्याधिष्ठानमेव शिष्यते। अत उपादानकारणसत्तां विना न कोऽपि विकारः पृथगस्ति। यथोक्तं कैवल्यदीपिकाकारेण—

**वस्त्रतन्तुकिरीटकुण्डलनिष्ककाञ्चनकुञ्चिका-**
**मृत्तिकावदुदीक्षितामिह चैकमेव हि वस्तुतः।**
**कारणाद्व्यतिरिक्तमस्ति न कार्यवस्तु कदाचने-**
**त्यात्ममात्रविलोकनं त्वपवादमाहुरमुं बुधाः ॥[21] इति शम्।**

---

अधिष्ठाता – दर्शनसङ्कायः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्,गुजरात।

[19]भगवद्गीता शाङ्करभाष्योपेता १३.१३
[20]कैवल्यदीपिका १.२६
[21]कैवल्यदीपिका १.४७